Reg. No. [ ]

# BASSKL 252/BSWSKL 252

**Credit Based IV Semester B.A./B.S.W. Degree Examination,**
**May/June 2016**
**(Common to All Batches)**
**SANSKRIT LANGUAGE**

Time : 3 Hours Max. Marks : 80

*सूचना :* *1) **चतुर्थ, अष्टम, नवम**प्रश्नानाम् उत्तराणि **संस्कृत** भाषया एव लिखत।*
*2) इतरप्रश्नानाम् उत्तराणि **संस्कृत**भाषया, **आंग्ल**भाषया, **कन्नड**भाषया वा लेखितव्यानि।*

1. अधोनिर्दिष्टगद्यभागेषु **द्वयोः** अनुवादं कुरुत। **(2×5=10)**

1.1) जानपदोऽभिजातः स्ववग्रहः कृतशिल्पः चक्षुष्मान् प्राज्ञो धारयिष्णुः दक्षो वाग्मी प्रगल्भः प्रतिपतिमान् उत्साह-प्रभावयुक्तः क्लेशसहः शुचिर्मैत्रो दृढभक्तिः शीलबल-आरोग्यसत्त्वसंयुक्तः स्तम्भचापाल्यवर्जितः संप्रियो वैराणाम् अकर्तेति अमात्यसंपत्। अतः पादार्धगुणहीनौ मध्यमावरौ।

1.2) पञ्चपुरं नाम नगरमस्ति। तत्रत्यस्य धर्मशीलस्य सत्यशर्मणः पुत्र एव देवशर्मा। अधीतविद्योऽयं, पिता यथा न जानीयात्, तथा देशान्तरं गत्वा भागीरथीतीरे तपस्तेपे। एकदा गङ्गातीरे स तपस्वी जपं कर्तुमुपविष्टवान्। तस्मिन् सन्दर्भे उड्डीयमानया कयाचिद् बलाकया तस्योपरि पुरीषोत्सर्गः कृतः। सोऽपि क्रोधेन यदा तामपश्यत् तदा सा दग्धा भूमावपतत्।

1.3) अस्ति मलयो नाम पर्वतः। तस्य शृङ्गे मनोहरं नाम गन्धर्वपुरम्। तत्र मदनो नाम गन्धर्वः, तस्य भार्या रत्नावली। तयोः सुता मदनमञ्जरी। तस्या रूपसंपदं दृष्ट्वा देवो वा दानवो वा अधोमुखो मुह्यति। न कोऽपि तदनुरूपो वरो लभ्यते यस्मै सा दीयते। अथ अन्यदा नारदः समायातः। सोऽप्यस्या रूपम् अवलोक्य मूर्च्छितः सकामः अभवत्। पश्चात् लब्धसंज्ञेन ऋषिणा सा शप्ता।

P.T.O.

2. अधोनिर्दिष्टपद्यभागेषु **द्वयोः** अनुवादं कृत्वा स्वारस्यं लिखत।

2.1) घटो जन्मस्थानं मृगपरिजनो भूर्जवसनो
वदे वासः कन्दादिकमशनमेवं विधगुणः।
अगस्त्यः पाथोधिं यदकृत कराम्भोजकुहरे
क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे ॥

2.2) प्रथमवयसि पीतं तोयमल्पं स्मरन्तः
शिरसि निहितभारा नारिकेला नराणाम्।
ददति जलमनल्पास्वादमाजीवितान्तम्
न हि कृतमुपकारं साधवो विस्मरन्ति ॥

2.3) अर्धं दानववैरिणा गिरिजयाप्यर्धं शिवस्याहृतम्
देवेत्थं जगतीतले पुरहराभावे समुन्मीलति।
गङ्गासागरमम्बरं शशिकला नागाधिपः क्ष्मातलम्
सर्वज्ञत्वमधीश्वरत्वमगमत् त्वां मां च भिक्षाटनम्।

3. **चतुर्णां** वाक्यानाम् ससन्दर्भं विवरणं कुरुत।

3.1) योगः चित्तवृत्तिनिरोधः।

3.2) सहाध्यायिनः अमात्यान् कुर्वीत।

3.3) यावज्जीवं निराशोऽसि कल्याणाय धुरं वह।

3.4) मार्गारब्धाः सर्वयत्नाः फलन्ति।

3.5) लक्ष्मीः स्वयं याति निवासहेतोः।

3.6) कोपेन भस्मीकर्तुं नाहं बलाका।

3.7) विधिरहो बलवानिति मे मतिः।

3.8) तदुपरि दिनमेकं पादरक्षाप्रयोगः।

4. **द्वयोः संस्कृतेन** टिप्पणीं लिखत।

4.1) महर्षिः पतञ्जलिः।

4.2) श्वशुरगृहनिवासः।

4.3) वेङ्कटाध्वरिः।

4.4) सुभाषितानि।

(2×5=1

5. द्वयोः न्याययोः उक्तिं विशदीकुरुत। (2×3=6)

5.1) अन्धगजन्यायः।

5.2) अरण्यरोदनन्यायः।

5.3) बकबन्धन्यायः।

5.4) रज्जुसर्पन्यायः।

6. द्वयोः संस्कृतेन आंग्लभाषया कन्नडभाषया वा टिप्पणीं लिखत। (2×5=10)

6.1) मन्त्रिपरिषत्।

6.2) चम्पूकाव्यम्।

6.3) शुकेन कृताः उपकाराः।

6.4) कविः बिल्हणः।

7. द्वयोः प्रश्नयोः प्रबन्धरूपेण उत्तराणि लिखत। (2×8=16)

(4×3=

7.1) भोजप्रबन्धे कार्यसिद्धेः कारणं किमिति प्रतिपादितम् ? विवृणुत।

7.2) पितृसेवा परो धर्मः इति नीतिं शुकसप्ततिः पाठानुसारं समर्थयत।

7.3) विक्रमाङ्कदेवचरितम्–अस्य पद्यस्य सारांशम् लिखत।

7.4) विनोदसंवादश्लोकानां स्वारस्यं सोदाहरणं विवृणुत।

8. अधोनिर्दिष्टेषु षट् वाक्यानि पाठ्याधारेण पूरयत। (1×6=6)

8.1) योगशास्त्रप्रणेता __________ ।

(भृगुः, पतञ्जलिः, वसिष्ठः)

8.2) श्वशुरगृहनिवासः __________ नराणाम्।

(भूमितुल्यः, स्वर्गतुल्यः, नरकतुल्यः)

(2×

8.3) सुवर्णालङ्कृता __________ ।

(कृष्णः, कन्या, गोविन्दः)

8.4) ________ परो धर्मः।

(पितृसेवा, हिंसा, निर्दया)

8.5) कण्टकं ________ निष्कासनीयम्।

(कण्टकेनैव, तूष्णीम्, मन्दबुद्ध्या)

8.6) ________ प्रकरोति शब्दम्।

(वायुमार्गे, सोपानमार्गे, भूमिमार्गे)

8.7) अर्धं दानववैरिणा ________ ।

(अपहृतम् , अपहृता, अपहृतः)

8.8) हता ________ वयम्।

(पाणिनिना, कविना, दासेन)

9. संयोजयत।

| | |
|---|---|
| 9.1) पतञ्जलिम् | विक्रमाङ्कदेवचरितम् |
| 9.2) देवशर्मकथा | कौटिल्यः |
| 9.3) अर्थशास्त्रम् | प्राञ्जलिरानतोऽस्मि |
| 9.4) बिल्हणः | शुकसप्ततिः |

---